# A-III/1/22ASHS3CCTC1/23

## तृतीयसत्रार्द्धः

## प्रथमपत्रम् (DSCC-24)

## साहित्यम्

**समयः घण्टाद्वयम्** **पूर्णाङ्काः 60**

## खण्डः – क

**केचन दश प्रश्ना एव समाधेयाः।** 10 (प्रश्नः) × 02 (अङ्कः) = 20

1. 'रामेण प्रियजीवितेन' इत्यत्र कथं पदप्रकाश्यता?
2. केषां कृते कालो न दुःखमयो नापि सुखमयः?
3. सुकवेः भारती केन भाति?
4. के वर्णाः शृङ्गारव्यञ्जकाः सन्ति?
5. प्रबन्धकाव्ये कीदृशी कथा योजनीया?
6. अविवक्षितवाच्यस्य अत्यन्ततिरस्कृतवाच्यप्रभेदे वाक्यप्रकाशकताया उदाहरणं किम्?
7. 'वृत्तेऽस्मिन् महाप्रलये धरणीधारणायाधुना त्वं शेषः' वाक्यमेतत् कस्य काव्यस्य वर्तते?
8. उत्कम्पिनी भयपरिस्खलितांशुकान्ता का वर्तते?
9. 'व्रीडायोगान्नतवदनया सन्निधाने गुरूणाम्' इत्यादिपद्ये किं छन्दः किं च तस्य लक्षणम्?
10. प्रकृतग्रन्थानुसारं गुणस्य लक्षणं किम्?
11. 'विच्छित्तिः' इति पदस्य कोर्थः?
12. औत्पत्तिकशब्दार्थसम्बन्धवादिनः के?
13. सङ्घटनाः कतिविधाः? काश्च ताः?

## खण्डः – ख

**केचन चत्वारः प्रश्ना एव समाधेयाः।** 04 (प्रश्नः) × 05 (अङ्कः) = 20

14. ध्वनिः काव्यविशेषः' इत्युक्तं तत्कथं तस्य पदप्रकाश्यता? विवेचयत।
15. असंलक्ष्यक्रमव्यङ्ग्यस्य कति भेदाः? ग्रन्थदिशा स्पष्टयत।

16. संलक्ष्यक्रमव्यङ्ग्यस्य अर्थशक्त्युद्भवे स्वतः सम्भविनि वाक्यप्रकाश्यता कथं भवति? सोदाहरणं सङ्घटयत।

17. 'कविप्रतिभया दोषाः आच्छादिताः भवन्ति' अत्र का युक्तिः? स्पष्टयत।

18. व्रीडायोगान्नतवदनया इति पद्यस्य व्याख्यां कृत्वा ध्वनिं स्पष्टयत।

19. क्षिप्तो हस्तावलग्नः ....इति सम्पूर्णपद्यं विलिख्य अत्र कयोः रसयोः अङ्गत्वम्? कस्य च प्राधान्यम्? इति स्पष्टयत।

## खण्डः – ग

**द्वौ प्रश्नौ एव समाधेयौ।** **02 (प्रश्नः) × 10 (अङ्कः) = 20**

20. 'गुणानाश्रित्य तिष्ठन्ती माधुर्यादीन् व्यनक्ति सा' इति कारिकांशं व्याख्यात।

21. रसविरोधितत्त्वं तत्परिहारश्च इति विषयम् आश्रित्य एको निबन्धो लेख्यः।

22. ध्वन्यालोकदिशा व्यजनाविरोधिमतानि निरस्य व्यञ्जनां स्थापयत।

# A-III/2/22ASHS3CCTC2/23

## तृतीयसत्रार्द्धः

## द्वितीयपत्रम् (DSCC-25)

## साहित्यम्

**समयः घण्टाद्वयम्** **पूर्णाङ्काः 60**

### खण्डः – क

**केचन दश प्रश्ना एव समाधेयाः।** **10 (प्रश्नः) × 02 (अङ्कः) = 20**

1. 'अनुरागवती सन्ध्या' इत्यादिपद्यं कस्य गूणीभूतव्यङ्ग्यस्योदाहरणम्?
2. उपमाया दीपकगर्भता कस्मिन् उदाहरणे प्रदर्शिता अस्ति?
3. 'स्वस्था भवन्ति मयि जीवति धार्तराष्ट्रा' इति कीदृशस्य काव्यस्य उदाहरणं भवति?
4. यस्मिन् काव्ये रसादितात्पर्यं नास्ति तस्य गुणीभूतव्यङ्ग्यस्य किम् उदाहरणं ग्रन्थे प्रदत्तमस्ति?
5. 'लावण्यद्रविणव्ययो न गणितः' इत्यादिश्लोके कः अलङ्कारः स्वीक्रियते?
6. सङ्करालङ्कारः कतिविधः? नामानि लिखत।
7. संवादः कतिविधः?
8. रीतीनां प्रवर्तकः कः? कस्मिन् ग्रन्थे रीतिं प्रत्यपादयत्?
9. केन मार्गाश्रयणेन कवीनां प्रतिभागुणः आनन्त्यम् आयाति?
10. रामायणे अङ्गीरसः कः?
11. कं पदार्थमवाप्य सर्वे पदार्थाः नवीना इवाभान्ति?
12. व्यङ्ग्यव्यञ्जकभावस्य कस्मिन् प्रभेदे कविना अवधानवता भाव्यम्?
13. परस्परं विरोधिनः के रसाः सन्ति?

### खण्डः – ख

**केचन चत्वारः प्रश्ना एव समाधेयाः।** **04 (प्रश्नः) × 05 (अङ्कः) = 20**

14. 'सैषा सर्वत्र वक्रोक्तिः' इत्यादिकारिकां सप्रसङ्गं विस्तरेण व्याख्यात।
15. चित्रकाव्यलक्षणं विलिख्य तद्भेदौ सोदाहरणं लिखत।

16. ग्रन्थानुसारेण काव्ये ध्वनेरपरिहार्यत्वं साधयत।

17. 'रीतीनां वृत्तीनां च मूलं ध्वनिः' इत्याश्रित्य एकं निबन्धं लिखत।

18. 'अवस्थादेशकालादिविशेषैरपि जायते।
आनन्त्यमेव वाच्यस्य शुद्धस्यापि स्वभावतः'। कारिकामिमां व्याख्यात।

19. 'संवादास्तु भवन्त्येव बाहुल्येन सुमेधसाम्' कारिकामिमां ग्रन्थदिशा विवेचयत।

**खण्डः – ग**

**द्वौ प्रश्नौ एव समाधेयौ।** **02 (प्रश्नः) × 10 (अङ्कः) = 20**

20. ध्वन्यालोकस्यालोके गुणीभूतव्यङ्ग्यस्य लक्षणं विलिख्य विस्तरेण विवेचनं कुरुत।

21. काकुनामकस्य गूणीभूतव्यङ्ग्स्य सोदाहरणं लक्षणं लिखत।

22. महाभारतस्याङ्गी रसः शान्तो वर्तते' इति ध्वन्यालोकदिशा प्रतिपादयत।

# A-III/3/22ASHS3CCTC3/23

## तृतीयसत्रार्द्धः

## तृतीयपत्रम् (DSCC-26)

## साहित्यम्

**समयः घण्टाद्वयम्** **पूर्णाङ्काः 60**

### खण्डः – क

**केचन दश प्रश्ना एव समाधेयाः।** **10 (प्रश्नः) × 02 (अङ्कः) = 20**

1. सौन्दर्यशब्दस्य व्युत्पत्तिः का ?
2. रससूत्रं किम् ?
3. ध्वनेर्लक्षणं किम् ?
4. वक्रोक्तिसम्प्रदायस्य प्रवर्तकः कः ?
5. औचित्यसम्प्रदायसम्बन्धिनः कस्यचिदेकस्य ग्रन्थस्य नाम लिखत।
6. सौन्दर्यशास्त्रविषये पाश्चात्यानां कयोश्चिद् द्वयोः सिद्धान्तयोः नामनी लिखत।
7. प्लेटो कस्य शिष्यः आसीत् ?
8. अभिव्यञ्जनासिद्धान्तस्य प्रमुखः दार्शनिकः कः ?
9. 'लाँञ्जाइनस्' इत्याख्यो विद्वान् केन सिद्धान्तेन सम्बद्धोऽस्ति ?
10. Poetics पॉयटिक्स कस्य पुस्तकमस्ति ?
11. अलङ्कारसम्प्रदायस्य प्रवर्तकः कः ?
12. "काव्यालङ्कारसूत्रम्" इति कस्य रचना ?
13. विरेचनसिद्धान्तस्य कयोश्चित् द्वयोः आचार्ययोः नामनी लिखत।

### खण्डः – ख

**केचन चत्वारः प्रश्ना एव समाधेयाः।** **04 (प्रश्नः) × 05 (अङ्कः) = 20**

14. किं नाम सौन्दर्यम् ? कथं च तस्यानुभूतिर्जायते ? विवेचयत।
15. पाश्चात्यदिशा सौन्दर्यानुभूतिं वर्णयत।

16. बिम्बवादं विवेचयत।

17. रीतिसिद्धान्तं निरूपयत।

18. प्लेटो-अरस्तू चेत्यनयोः अनुकरणसिद्धान्ते को भेदः?

19. 'कलावादः' इत्यस्य कोऽभिप्रायः स्वगिरा वर्णयत।

**खण्डः – ग**

**द्वौ प्रश्नौ एव समाधेयौ।** **02 (प्रश्नः) × 10 (अङ्कः) = 20**

20. 'सौन्दर्यानुभूतिविषये भारतीयाचार्याणामभिमतम्' इति विषयमधिकृत्य एकं निबन्धं लिखत।

21. ध्वनिसिद्धान्ते सौन्दर्यानुभूतिं प्रदर्शयत।

22. अभिव्यञ्जनावादसिद्धान्तं प्रकाशयत।